योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः ०४३

श्रीवसिष्ठ उवाच ।

अहंतादिजगच्चेदं परिज्ञानादसत्यताम् ।

याति सानुभवो मोहात्सत्यमेवान्यथाधियाम् ।। १

अज्ञानज्वरमुक्तस्य बोधशीतलितात्मनः ।

एतदेव भवेच्चिह्नं यद्भोगाम्बु न रोचते ।। २

अलमन्यैः परिज्ञानैर्वाच्यवाचकविभ्रमैः ।

अनहंवेदनामात्रं निर्वाणं तद्विभाव्यताम् ।। ३

परिज्ञाता यथा स्वप्ने पदार्था रसयन्ति नो ।

न च सन्ति तथैवास्मिन्नहं जगदिदंभ्रमे ।। ४

यथा स्वभावनाद्यक्षस्तरौ सस्वजनं पुरम् ।

पश्यत्यसत्यमेवैवं जीवः पश्यति संसृतिम् ।। ५

विभ्रमात्मा यथा यक्षो यक्षलोकश्च ते मिथः ।

सद्रूपौ सुस्थितौ मिथ्या तथाहंत्वजगद्भ्रमौ ।। ६

अनावरणतोऽरण्ये यक्षा विभ्रमरूपिणः ।

यथा स्फुरन्ति भूतानि तथेमानि चतुर्दश ।। ७

भ्रममात्रमहं मिथ्यैवेति बुद्ध्वा विभावयन् ।

यक्षोऽयक्षत्वमायाति चित्तं चित्तत्त्वतामिदम् ।। ८

निरस्तकलनाशङ्कं त्यागग्रहणवर्जितम् ।

अविसारिसमस्तेच्छं शान्तमास्व यथास्थितम् ।। ९

असत्तासंभवं दृश्यं द्रष्ट्रात्मकमिदं ततम् ।

अथवा नैव द्रष्ट्रात्म सदवाच्यं किमास्यते ।। 6.2.43.१०

वसन्तरसपूरस्य यथा विटपगुल्मता ।

स्वरूपमात्रभरितसंविदः सर्गता तथा ।। ११

यदिदं जगदाभासं शुद्धं चिन्मात्रवेदनम् ।

कात्रैकता द्विता का वा निर्वाणमलमास्यताम् ।। १२

भूयतां चिन्मयव्योम्ना पीयतां परमो रसः ।

स्थीयतां विगताशङ्कं निर्वाणानन्दनन्दने ।। १३

किमेतास्वतिशून्यासु संसारारण्यभूमिषु ।

मानवा वातहरिणा भ्रमथो भ्रान्तबुद्धयः ।। १४

जगत्त्रयमरीच्यम्बु विप्रलब्धान्धबुद्धयः ।

मा धावत गतव्यग्रमाशयोपहृताशयाः ।। १५

रूपालोकमनस्कारमृगतृष्णाम्बुपायिनः ।

व्यर्थमायासमायूंषि मा मा क्षपयतैणकाः ।। १६

जगद्गन्धर्वनगरगुरुगर्वेण नश्यथ ।

सुखरूपाणि दुःखानि नाशनायैव पश्यथ ।। १७

जगत्केशोण्ड्रकभ्रान्त्यै मा महाम्बरमध्यगम् ।

अवलोकयताभ्रान्ते स्वरूपे परिणम्यताम् ।। १८

मानवा वातलोलोच्चपत्रप्राप्ताम्बुभङ्गुर- ।

मानवासु न चास्वन्धगर्भशय्यासु सुप्यताम् ।। १९

अविराममनाद्यन्ते स्वभावे शान्तमास्यताम् ।

द्रष्टृदृश्यदशादोषादस्वभावाद्विनश्यताम् ।। 6.2.43.२०

अज्ञावबुद्धः संसारः स हि नास्ति मनागपि ।

अवशिष्टं च यत्सत्यं तस्य नाम न विद्यते ।। २१

त्रोटयित्वा तु तृष्णायःशृङ्खलावलितं बलात् ।

संसारपञ्जरं तिष्ठ सर्वस्योर्ध्वं मृगेन्द्रवत् ।। २२

आत्मात्मीयग्रहभ्रान्तिशान्तिमात्रा विमुक्तता ।

यथा तथा स्थितस्यापि सो स्वसत्तैव योगिनः ।। २३

निर्वाणताऽवासनता पराऽपतापताज्ञता ।

संसाराध्वनि खिन्नस्य शान्ता विश्रामभूमयः ।। २४

तज्ज्ञज्ञातो न मूर्खाणां मूर्खज्ञातो न तद्विदाम् ।

विद्यते जगदर्थोऽसाववाच्यार्थमयो मिथः ।। २५

विश्वता भ्रान्तिसंशान्तौ संस्थितैव न लभ्यते ।

महार्णवाम्बुवलिता पुत्रिकेव पयोमयी ।।

भ्रान्तिशान्तौ प्रबुद्धस्य विनिर्वाणस्य विश्वता ।

यथास्थितैव गलिता विद्यते च यथास्थितम् ।। २७

निर्दग्धतृणभस्माली क्वापि याति यथानिलैः ।

सतां स्वभावविश्रामैः क्वापि याति तथा जगत् ।। २८

जगद्ब्रह्मपदार्थस्य संनिवेशः स तूत्तमः ।

ब्रह्मशब्दार्थरूपात्मा न जगच्छब्दकार्यभाक् ।। २९

अविज्ञातस्य बालस्य पदार्था यादृशा इमे ।

विदुषस्तादृशा एव तिष्ठतः क्षीणवासनम् ।। 6.2.43.३०

या निशा सर्वभूतानां तस्यां जागर्ति संयमी ।

यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः ।।३१

स्थितमेवाऽविरामी यज्जाग्रदस्य सुषुप्तवत् ।

चित्रावलोकित इव जाग्रत्योऽस्य रसैषणाः ।। ३२

जात्यन्धरूपानुभवसमं भुवनवेदनम् ।

भ्रान्तप्रायमसद्रूपं ज्ञस्य भाति न भाति च ।। ३३

विमूढदुःखं त्रिजगद्विमूढविषयं न सत् ।

स्वप्ने स्वप्नतया ज्ञाते रूपालोकमनःक्रियाः ।। ३४

न स्वदन्ते यथा तद्वज्जाग्रत्स्वप्ने स्फुरन्तु मा ।

निर्विभागः समाश्वस्तोऽविरोधं परमागतः ।। ३५

आशीतलान्तःकरणो निर्वाणो ज्ञोऽवतिष्ठते ।

तज्ज्ञस्याकृष्टमुक्तस्य समं ध्यानं विना स्थितिः ।। ३६

निम्नं विनैव तोयस्य न संभवति काचन ।

अर्थ एव मनस्कारो मन एवार्थरञ्जनम् ।। ३७

एष एवैष आभासः सबाह्याभ्यन्तरात्मकः ।

आसमुद्रं नदीवाहशतसंघमयात्मकम् ।। ३८

यथैकश्लेषपिण्डात्म वहत्यम्बु तरङ्गिणाम् ।

सबाह्याभ्यन्तराकारमर्थानर्थमयात्मकम् ।। ३९

मन एव स्फुरत्यर्थनिर्भासं व्याततं तथा ।

नास्त्यर्थमनसोर्द्वित्वं यथा जलतरङ्गयोः ।। 6.2.43.४०

एकाभावे द्वयोः शान्तिः पवनस्पन्दयोरिव ।

नूनमेकोपशान्त्यैव निःसारे परमार्थतः ।। ४१

एकत्वादर्थमनसी सममेवाशु शाम्यतः ।

अर्थः संकल्परूपात्मा नेहितव्यो विजानतो ।। ४२

मनश्च सम्यग्ज्ञानेन शान्तिरेवं भवेत्तयोः ।

अनष्टे नश्यतश्चैतै ज्ञस्यार्थमनसी स्वतः ।। ४३

मृन्मये द्विषति ज्ञानाद्द्विषद्भावभये यथा ।

यथासंख्यं स्थिते एव ज्ञस्यार्थमनसी सदा ।। ४४

किमप्यपूर्वमेवान्यत्संपन्ने भावरूपिणि ।

संहितार्थजगत्कालोऽप्यज्ञोऽज्ञविषयोऽप्यसत् ।। ४५

पार्श्वसुप्तनरस्वप्न इव क्लीबाग्रयक्षवत् ।

ज्ञस्य साज्ञं जगन्नास्ति वीरस्येव पिशाचधीः ।। ४६

ज्ञमज्ञो भावयत्यज्ञं चिरं वन्ध्यापि वर्धते ।

विनैव ज्ञातशब्दार्थमर्थभावमिवागतम् ।। ४७

स्थितं बोधमनाद्यन्तं स्वभावं सर्गगं विदुः ।

मनः शब्दार्थरहितं विभागान्तविवर्जितम् ।। ४८

बोधवारिमनोबुद्धितरङ्गमिव निर्मलम् ।

क्व संभवत एवान्तः के वार्थमनसी किल ।। ४९

निरर्थिकैव विभ्रान्तिः स्वभावमयमास्यताम् ।

शुद्धबोधस्वभावस्थैराकाशमिव शारदैः ।। 6.2.43.५०

जाग्रत्स्वप्नसुषुप्तान्तैर्मनस्त्वं नानुभूयते ।

विधूयानन्तनानात्वमसद्भावमनामये ।। ५१

ज्ञेयं रज्जुरिवाशेषं स्वभावे तिष्ठ चिद्घने ।

ज्ञप्तिरेवान्तरं बाह्यं चार्थत्वमधितिष्ठति ।। ५२

बीजं शाखाफलानीव क्वातोऽर्थमनसी वद ।

ज्ञेयासंभवतो ज्ञप्तिरप्यनाख्यं पदं गता ।। ५३

शान्ताशेषविशेषात्मा तेन शेषोऽस्ति सत्स्वभाः ।

अर्थ एव मनस्कारः स चाभावात्मको भ्रमः ।। ५४

मन एवार्थसंस्कारः स चाभावात्मको भ्रमः ।

सर्वात्मत्वादजस्यैतदप्यकारणकं मनः ।। ५५

भ्रमानुभवतोऽर्थश्च मिथ्यैवास्तीव भासते ।

अकारणकमेवार्थनिर्भासं भासते मनः ।। ५६

विद्युद्विलसिताकारमस्थिरं तरलायते ।

त्वं मनस्कारमात्रात्मा संसृतौ विभ्रमायसे ।। ५७

स्वभावैकपरिज्ञानान्नासि नापि भ्रमायसे ।

मनसैव हि संसार आत्मबोधेन शाम्यति ।। ५८

शुक्तिरूप्यभ्रमाकारो जनो मिथ्यैव ताम्यति ।

अभावभावस्तु परं बोधरूपमसंसृतिः ।। ५९

निर्वाणादितरा सत्ता दुःखायाहमिति भ्रमः ।

मृगतृष्णाम्बुरूपोऽहमसच्छून्यस्वरूपकः ।। 6.2.43.६०

इत्येवात्मपरिज्ञानादहमित्येव शाम्यति ।

ज्ञात्वा ज्ञानमयो भूत्वा सबाह्याभ्यन्तरार्थताम्।। ६१

गतं स्वमत्यजद्रूपं तरङ्गत्वं यथा पयः ।

मूलशाखाग्रपर्यन्ता सत्ता विटपिनो यथा ।। ६२

निर्विकारमलं ज्ञप्तेर्ज्ञेयान्तैकैव भासते ।

यथा योजनलक्षाभमेकमेवामलं नभः ।। ६३

एकमेव तथा ज्ञानं ज्ञेयान्तं भात्यखण्डितम् ।

शून्यत्वादेकममलं यथा सर्वगमेव खम् ।। ६४

तथैकममलं ज्ञात्वा ज्ञानज्ञेयदशास्वपि ।

घृतेनात्मा घनीभूय पाषाणीक्रियते यथा ।। ६५

चिता चेत्यतयात्मैव स्वचित्तीक्रियते तथा ।

देशकालं विनैवात्मा बोधाबोधेन चित्तताम् ।। ६६

अबुद्धो नीयते न्यायैरेकमेवैष सुस्थितः ।

अत्र यद्यप्यबोधादेः संभवो नास्ति कश्चन ।

तथापि कल्प्यतेऽत्रैव बोधनाय परस्परम् ।। ६७

महानुभावा विगताभिमाना

विमूढभावोपशमे गलन्ति ।

निर्भ्रान्तयोऽनन्ततयैव शान्ता

नित्यं समाधानमया भवन्ति ।। ६८

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मोक्षो० निर्वाण० उ० ब्रह्मैकतानतोपदेशो नाम त्रिचत्वारिंशः सर्गः ।। ४३ ।।